
१० पत्राणि

बृहद्ध्यानकम् सटीकम्

५६० ५६०



सं. [illegible]
आनन्द[illegible]
१० पत्राणि [illegible]
[illegible]

अ.श.टी
१

श्रीगणेशाय नमः विद्याविनतिमुक्तिंभुक्तिमविद्यावतां भजिष्यामः याचरमाचरमायाशक्तिः सा नः शिवं दिशतु १ तनुमयरसप
रिपाठीपरिहृतवारीभिमां रम्यां कुरुते मरुशतटीकां ज्ञानानंदकलाधरः २ योऽसौ भाग्यवता विभक्तवलितज्ञानामृतानंदपुर्येवात्स्याय
नकामतंत्रविलसत्केलिक्रियाकौशलः व्याचक्षे तरसद्वयं कविकुलालंकारचूडामणिः श्रीलक्ष्मीरविचंद्रस्तपिमुनामात्सर्यतामुत्सृजन् ३
यदि स्यामरमानंदे रमानंदे च वा मनः तदासंसेव्यतामेषा रटीकाद्यं कामदा सदा ४ क्वचातिकर्कशः शांतः क्वचातिललितः शुचिः एकत्र वाक्यवारमा
तुं तावन्नो कौशलः कवेः ५ निर्विघ्नप्रारीप्सितशतसमाप्तिकामो ग्रंथकृदिष्टदेवतां कीर्तयन्नाह ज्याकृष्टेति ग्रंथिकायाः पार्वत्याः कटाक्षोऽ

ज्याकृष्टबद्धखटकामुखपाणिपृष्ठप्रेंखन्नखांशुचयसंवलितोंबिकायाः त्वां पातु मंजरितपल्लवकर्णपूरलोभभ्रमद्भ्रमर
विभ्रमभृत्कटाक्षः १

पांगदर्शनं त्वां पातु रक्षतु अत्र संबोधनपदे प्रयुक्तं पुष्यच्छंदे नाक्षतेति स किंभूतः ज्याधनुर्गुणस्तस्याः कृष्टिराकर्षणं तत्र बद्धः खटकामुखं नाम अंगु
लिरचना विशेषस्तेन पाणिपृष्ठे प्रेंखन्तस्तत्कालभवंतो नखांशुचयस्तेन संवलितः मिश्रितः पुनः किंभूतः मंजरितः पल्लवः मंजरीयुक्तः किसलयो यत्र कर्णपूरे
तत्र लोभेन भ्रमन्यो भ्रमरस्तस्य विभ्रमो विलासस्तद्धारतत्तत्सदृशाकृत्य विशेषणं अप्रयोजकं किं कावर्णमाकर्षणं धनुर्गुणस्येति ध्वन्यते चक्षुःप्रीतिर्मनः संगसंकल्पा
दिषो दुशः शृंगारणां मध्ये चक्षुःप्रीतेरायतत्वात्प्रथमतः कटाक्षवर्णनं ननु शृंगारशतकमिदमिति प्रसिद्धेः कथं शांतिरसोऽत्र तत्रोच्यते भगवान् शंक
राचार्यो दिग्विजयच्छलेन काश्मीरमगमत् तत्र शृंगारवर्णनार्थं समेरर्थितः शृंगारीयं चेत्कविः काव्यजातं रसमयं चव्यादेति वचनादिमरुनाम्नो रा

राम
१

राज्ञो मृतस्य परवपुःप्रवेशविद्यया शरीरे प्रवेशं कृत्वा स्त्रीशतेन सह केलिं विधाय प्रातस्तथा कारयामास पिशुनैः कापटिकोपमा जन्मब्रह्मचारी सुपहसितः शांति
रसमत्र माघ शांतस्य मोक्षसाधनत्वात् विष्णुमायायां प्रसन्नायां लभ्यते तथा चैषा प्रसन्ना वरदा इति वचनमाश्रित्याह अंबिकाया महामायायाः कटाक्ष
स्त्वां पातु रक्षतु अपापृथ्वी माता वा अपां मोधी माता भूमिः क्षितिर्विश्वेः तत्राक्षिभिः संबद्धः नयावद्भासामारिकाः तत एव षट्कामुखपाणिपृष्ठे प्रेंखन्नखांशुचया इति रूपकं अस्थि
रत्वात् तैः संवलितः स्पष्टः किंवाऽस्मात्स्वच्छः पुराणपंडिताः सांसारिकास्तेषां संबोधने खट्वकव्यापकं यत् आमुखं संधिः तस्य पाणिपृष्ठे तेषां नखांशुचय इव संवलितः संपातः
खट्वांको क्षेधातुः आमुखशब्दो नाटकसंधौ प्रसिद्धः अत्र लाक्षणिकः पुनः किंभूतः मञ्जरितो बहुलीकृत पल्लवः पदं नेयत् तस्य लवो अवसायलेशः स चासौ कर्णपूरश्चेति क
र्णपूरयति सुखदत्वात् एवंभूतो यो लोभस्तत्र भ्रमन्यो भ्रमो मिथ्याज्ञानं स एव विभ्रमः अंधकारस्तं बिभर्तीति भ्रमो मिथ्याज्ञानं यत्र स चासौ कामश्चेति स्यात्कामे निलेन रूढि

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण आलिंगन्योऽवधूत
स्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः २

तितस्याभ्रमोंऽधकारस्तं बिभर्ति किंवा भ्रमं राति ददातीति तं यो बिभर्ति एतेन स्थिरः संसारलोभोऽर्थांधकार इति ध्वन्यते १ पार्वतीं स्तुत्वा शिवं स्तुवन्नाह क्षि
प्त इति शांभवः शराग्निः वो युष्माकं दुरितं पापं दहतु भस्मीकरोतु किंभूतः त्रिपुरनाम्नो असुरस्य युवतिभिः कोताभिः क्षिप्तः सन् हस्तावलग्नः प्रसभं बलात्कारेण
अभिहतो वस्त्रांतं गृह्णन् केशेषु गृह्णन् अपास्तो वारितः चरणनिपतितः संभ्रमेण न दृष्टः आलिंगन्सन् अवधूतः कंपायितः किंभूताभिः साश्रुनेत्रोत्पलाभिः शो
कात् त्रिपुरदाहे शंभोः शराग्निः अर्थात्त्रीणि पुराणि ददाह तथा त्रिविधदुरितं दहतु इति ध्वन्यते क इव आर्द्रापराधः नूतनदोषः कामीव आर्द्रशब्देन लक्षणया तत्का
लीन उच्यते अथ च कामी युवतिभिर्हस्तावलग्नः सन् क्षिप्तः युवतिभिरित्येकदेशेन अन्यत्समानार्थं अत्राग्निरिव दृष्टांतो नायको मानिन्या क्षिप्तो हस्तावलग्नः अ

भिर्हतो भिवरत्वांतं गछन्तु एवमन्या पि अपि शब्देन योजनामात्त नेत्रोत्पलाभिरित्यनेन मानातिशयत्वं ध्वन्यते मानोपिकामवर्द्धक इति प्रथममानो मानिनी

अ.श.टी. वर्ण्यानम् शांतपक्षे शांतानां पारं पर्य्यातिशयत्वं दर्शयति अवधूतो भागवताः पुरुषाः वस्तुष्मा दुरितं दहन्तु किं भूतः कामी अभिलाषुकः कीदृशाः उ

२ न्मत्तवेषः आत्मगोपनायावधूताङ्गनासवेशा भवंतिइति अहस्तावलग्नः अहः दिवसस्तत्प्रकाशः तत्रावलग्नः किंवा अः विष्णुस्तस्य हस्तेऽवलग्नः विष्णुना

गृहीतइत्यर्थः किंवा हस्तनक्षत्रं अवतीति हस्तावस्तस्मिन्नवलग्नः योगिनो हि सुकृतरक्षणपरा भवंतीति किंवा हस्तावलग्नः करपाशी अभिहितः अस्मत्कुना नया

ली हतेर्गत्यर्थत्वात् यद्यपि हं तेर्गमनार्थप्रयोगाभावः तथापि श्लेषे न दोषाभावात् अंशुकांतं कोपीनं गृह्णन्तः प्रशस्तोंऽशुकः इति तस्यांतं समीपं प्राप्नुवन् तत्र

नःपश्यतिवा कामिंद्रियेण स्पर्शादि विषयासक्तः सुरसगंधादिषु अपासक्तो वारितः चरणांवेदभागस्तत्र निपतितः प्रसन्नः वैदिकाचारमपकाः आलिंगनं रल

आलोलामलकावलिं विलुलितां बिभ्रच्चलत्कुंडलं किंचिन्मृष्टविशेषकं तनुतरैः स्वेदांभसः शीकरैः

तन्व्या यत्सुरतांततांतनयनं वक्त्रं रतिव्यत्यये तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ३

योरैक्यात् लिंगितत्यर्थः सम्यक्कृष्णरासशालीज्ञानशालीवा एवंभूतो अवधूतश्चेति अतएव त्रिपुरयुवतिभिः भावीदयात् साधुभिरपि दुःछिनो राम

विषयेष्वाशक्तः पुरुषो भवति कइव शांवः शराग्निरिव दुर्दर्शत्वात् कामी वार्द्रापराधः कामिंदेद्भिणितेषां अमी वंपापं तेनार्द्राक्लिष्याअपरांशक्तिं धारयतीति श २

त्रीभिर्वेतः पराचापराच अमीवशाद्दोदुरितवचनेभारतेवदुष्टादयः २ सहजश्रृंगारस्यमानमुपवर्ण्यविपरीतसुरतं वर्णयन्नाह आलोलामित्यादि तन्वंग्या

स्त्रीरतांऽस्यारतिव्यत्यये विपरीतरतौ यद्वक्त्रं तत्त्वां पातुरक्षतु किंभूतं हरिहरादिभिर्दैवतैरलं कीदृशं वक्त्रं अलकावलिं बिभ्रत् आलोलां विलुलितां चंचलां विलु

लितां विगलितां एतेन पुरुषायितत्वं व्यज्यते चलत्कुंडलमित्यनेन नायिकात्वं व्यज्यते स्वेदांभसो घर्मस्य कणैः किंचिदीषन्मृष्टविशेषकं तिलकं यत्र तनु

तनुतरै रत्यल्पैस्तरैः एतेनोत्तमः स्वेदः नायिकास्तत्तमत्वं व्यज्यते तदुक्तं स्वेदो हि त्रिविधः प्रोक्त उत्तमाधममध्यमः श्रमे महति योऽत्यल्प उत्तमः स प्रकीर्तितः लला
टे गंडयोः क्वापि चिबुके चापि दृश्यते श्रमानुरूपः स्वेदो यो मध्यमः स प्रकीर्तितः स ललाटशिरोग्रीवावक्षोदेशेषु जायते अल्पश्रमे महास्वेदोऽधमः सर्वदेहजः सु
रतांते क्रीडांते नांतनयनं स्नानने त्रं न मुस्नानो नांतमिति एवंभूतं कामिनीमुखं यदि सन्मुखी भवति किं दैवैः स्वर्गफलैर्देरित्यतिशयत्वं मुखे व्यज्यते शांतपक्षे त
न्त्रामायायां रतिव्ययये क्रीडापगमे सति यन्मुखं तदेव तत्स्वभवति तत्स्वोपानुरक्षतु यद्येवैषोपरता देवी मायावैशारदी मतिः संपन्न एवेति विदुर्महिम्नि स्वे महीयते इति
मारतवचनात् मायायामपगमस्यैव मोक्षकारणं सूचितं आलोलामलकावलिं विभ्रतं संस्कारहीनत्वात् चलत्कुंडलं अवधूताहरकुंडलिनो भवंति घर्मांजलेनाम्नि

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ४

सपुलकं धारणायामार्थः स्यादिति योगशास्त्रं सुरतांतस्यैव तांतनेत्रं अन्यद् द्वेरक्षमात् ३ पूर्वं कराक्षं वर्णयित्वा संप्रति दृष्टीवर्णयन्नाह अलसेति हे मुग्धे
बाले मुग्धा नववधूस्तत्र नववयो वनमंडिता नवालंकारदृष्टा चलज्जा मामाप्राहनिर्यथा इति रुद्रः तत्कथय कः सुकृती त्वया विलोक्यते कैरीक्षणैर्दर्शनैः किंभूतैरल
समालस्यं तेन वलितैः तत्संपृक्तैः प्रेमातिशयस्निग्धैः मुहुर्वारंवारं मुकुलितैः संकुचितैः क्षणमभिमुखैः लज्जालोलैश्चंचलैः क्षणमभिमुखेनेनान्वयः एतेन बाला
नायिकेति व्यज्यते तथा च कौतुकमस्ति उत्कंठा चात्र उपेक्षते हृदयनिहितं भावाकूतं वमद्भिरिव कौतुकाद्दालस्यं भयात्संकोचः उत्कंठया निमेषराहित्यं शांतपक्षे
कामिनमधिक्षिपति हे मुग्ध हे मूढ इत्यन्वयः उः कामस्तत्स्वभाववद्रूपं तं यातिगच्छति अयं को यद्वा प्रायं सुकृती पुण्यवान् शांतो विलोक्यते किंभूतैः ईक्षणैः चक्षु

अ॰श॰टी
२
3

भिरुपलक्षितः किंभूतैः अरसवलितैः रसः शृंगारः मुख्यत्वात्तत्र नक्षमैः अथवा अः विष्णुस्तत्र रसेन वलितैः अन्यत्समानं एतावता नयनं अवधूत
स्यापि भवति ४ बालां मानिनीं वर्णयन्नाह दत्तइत्यादि हे निःशंक हे निःशंक तावत्सखी रोदितु विमुक्तकंठं करुणं च इति यथा स्यात्तथा कथमित्याह अ
स्याः प्रणयः प्रेमाश्रयः त्वयैव दत्तः भवता च इयं चिरं लालिता वर्द्धिता अद्य दैवात् दैवयोगात् अस्याः नवं नूतनं विप्रियं त्वमेव कृतवान् एष मन्युः क्रोधः
शांतवादैः प्रीतिवचनैः शमं न याति शांतिवादाः कोपस्य प्रत्युत दीपनहेतवः ततो रोदित्वेव एतेन तस्याः रोदनेन लोकप्रचारो भवतु इति चातुर्य्यं मन्यते शां
तपक्षे हे मुक्त हे निःशंक हृतं सत्पदं त्वया मायासि गच्छन्नसि यातु उपशमं जातिज्ञानं या प्रापरोधा नोऽसमर्थत्वात् ज्ञानार्थत्वं तेनोपशमं शांतिं किंभूतं विप्रिय

दत्तोस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिताः दैवादद्य किल त्वमेव कृतवान्नस्याः नवं विप्रियं
मन्युर्दुःसह एष यात्युपशमं नो शांतवादैः स्फुटं हे निःशंक विमुक्तकंठकरुणं तावत्सखी रोदितु ५

मित्यमित्यादिस्युक्तं असीत्यसांतं आदितिविषादे नवं प्रत्यग्रं दैवाद्दिव्यं भाग्यं अस्तीति दैवात्कर्म्मणि विशेषो हि भागमुक्तस्तत्कर्म्मक्षयादेव अस्याः
मायायाः प्रणयस्त्वया दत्तः चिरं लालिता च इयं अद्य शांतोसि एष मन्युर्दुःसह तन्नोस्माकं सखी मायया रोदितु किंभूतमुपशमं शांतवादैः प्रियवचनैः स्फुटं राम
व्यक्तं कंठे करुणं च स्थितं अयं सर्वभूतदयायुक्तः प्रियवाक् प्रियदर्शनः इति भागवतलक्षणं तत्सूचितं तुष्टिपुष्टी लक्ष्मीप्रभृतयो मायायाः सख्यः ५ २
सखीं वर्णयन्नाह लिखन्नित्यादि मानिनीं सखी प्रसादयति तदुक्तं विनोदो मंडनं शिक्षोपालंभनप्रसाधने संगमो विरहाश्वासः सखीकर्म्मोदयस्तथेति
हे कठिने अधुना इदानीं मानं त्यज कथमित्याह तव प्राणदयितो बहिरास्ते किं कुर्वन् भूमिं लिखन् अकारणमेव लिखते अवनतो अधोमुखः सख्योपि नि

राहारा आहरणमाहारः तेन रहिताम्भवंतितत्कर्वर्णाक्षमा आहाररहितावानिराहाराइतिपाठे आश्रयहीनाभवंतीति आननप्रियेरवनतः कमाश्रित्यस्थास्यतीतिस र्वथाक्रंदनेसशोकनयना: पंजरशुकैः केलिकीरैरपिहसितपठितंपरित्यक्तं हासकारिपठितंमध्यमपदलोपीसमासः नवचेयमवस्थामलिनवस्त्रादिना कठिनरूप नेनमानस्यगुरुत्वं तदुक्तं अवेक्ष्यदोषमेतस्यगरीयान्मध्यमोलघुरितिमानस्यत्रैविध्यमुक्तं शांतपक्षे हेकठिनहे संसारस्थह ईमानंकामादंकारंत्यज कुतस्सकं मसिताह पंजरशुकैः सह हनवसितंपठितं देहपद्मपूरणे सितंवंधूकत्वसंधितं पठितंपाठः नकेवलंपाठः अत्रस्थाहशाच किंभूतं परिभिःपरज्ञानशीलेस्त्यक्तं कथंका मत्वाज्यः शांतरसआश्रयितमङ्गलाह आकंठेनिराहारानिरन्नपाननिराकर्वर्णांवा आःसततरुदितोच्छूननयनापुमान्ईश्वरआस्तेततोनिषेधात्वस्तिर्निवेधशोधोयत्र

कृ१०

लिखन्नास्तेभूमिंवहिरवनतःप्राणदयितोनिराहारासख्यःसततरुदितोच्छूननयनाः परित्यक्तंसर्वंहसितपठितंपंजरशुकैस्तवा वस्थाचेयंविसृजकठिनेमानमधुना ६ नार्यस्तन्विहृदयहरंतिरमणंतिष्ठंतिनोवारितास्तत्किंतम्यसिकिंचरोदिषिमुधातासांप्रियंमाकृथाः

तादृशाइतिभागवतः पुनःकिंभूतःप्राणदयितःअतिप्रेमात्सख्यःस्नानपानेनसहवर्ततइति लिखन्नूअर्थात्शुभकर्माणि ससाक्षीसर्वकर्मणामित्यस्तियतःई श्वरःसर्वकर्मसाक्षीआस्तेततःकामंत्यज शांतोभूत्वाभूमिंवत्सनिस्थानंअवरक्षतुपुनर्भ्रमणंप्राणादितिसंक्षेपः ६ सखीशिक्षाकर्ममाह नार्यइत्यादिना हेत न्विक्षीणांगिअतस्तायानार्यःप्राकृतस्त्रियोरमणंकांतंहरति वारितानियंत्रितानतिष्ठंति एतेनयाकृतत्वंतासांतत्समात्कथंताम्यसि किंचरोदसि एतेनतासामभिल षितेमाकृथाः किंकर्तव्यमित्याह हेकातरेवाकृप्रदानकृपणे अयंकांतःकमनीयवेशः केलिरुचिः प्रसन्नहृदयो शठः तादृक्अनुपमः पतिःकिंनविक्रीयते वर्वरकर्कैरारूप वर्वरकर्कैर्नीलोत्पलार्थानुकरणं किंभूतैःप्रियशतैः प्रियानामभिलषितानांशतंयत्र वर्वरत्नरूपाःपशुत्वदर्थकर्कशमूर्खाश्चयुः प्रियशतै रितिरूपकंवा शांतपक्षे इंद्रियसुपदिशति हेकइंद्रियनोस्माकं आतंरेशांतरसोपायेन आनरस्तरपरंपस्यादिति लक्षणाया संसारतरणोपायेनानेकथंता-

ष्यसिस्नानं भवति किंचरोदिसि अश्रु करोषि गौरवात् तादृक् पतिरीश्वरः शांताः कांताः कोवलातेषामतो यत इति अनंतकोटिब्रह्मांडेश्वरः कमनीयो वा केलीनां
लीलानां रुचिर्यत्र लीलाया रुचिर्यस्य वा जगदीश्वरलीलाविलसितमितिश्रुतेः क्रीडतो बालकस्येव चेष्टं तस्य निशामय इति श्रुतेः प्रसन्नहृदयः स्वपदस्य दाता किंप्रि
यशतैः आक्रम्य अवस्कंध क्रीडते यज्जते वरस्त्रुरुणः कर्कशः शूलस्तं शतानि ददातीति स तथा अश्ववाहनाधमिलोवैः श्वेताश्वैः सर्वकामदः इति अश्वशास्त्रे कथमुपेक्षते सद्गुमास
नार्थ्यः कांतास्तद् तु तत्स्म इति हठात् कामाहंकारात् हरंति दूरीकुर्वंति वारितानि निषिद्धानो तिष्ठंति तस्मात् प्रियमभिलषितं मा कृथा ब्रह्मोपासनेन नपेक्ष्यसीवाहनादि
सुखेन योज्यमिति संक्षेपः ७ संप्रति धीराधीरा मानमपनयमाह कोपादिति अधीरा हस्तसंतर्ज्य दयितं दृष्टदाहं तं रुद्रेण धम्मः प्रेयान्निकृतिपरो दोषतिरोधानका
रीरुदं तात् दयितया हन्मते प्रसूर्थ्यते किं कृत्वा चेष्टितं अन्यस्त्रीसंभाषादि चिह्नादिकं संसूच्य कथयित्वा कथां भूयः पुनरपि एवं न कार्य्यमिति कोमलगिरा यतस्तस्यापराधो हन्यते

कांतः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे किं नो बर्बरकर्कशैः प्रियशतैराक्रम्य विक्रीयते ७ कोपात्कोमललोलबाहु
लतिकापाशेन बध्वा दृढं नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः भूयो नैवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं धन्यो

न बद्धो याहन्यते कोपात् कोमललोलबाहुलतिकापाशेन दृढं बध्वा बाहुलतिकापाश इति रूपकं सत्वापराधी हन्यमानः लोकानां संमुखे हन्यते सखीनां पुरः सन्मुखे
केलिनिकेतनं केलिगृहे अत्र शठो नायकः तद्यथा प्रियं वक्ति पुरोन्यत्र विप्रियं कुरुते भृशं युक्तापराधश्चेष्टस्तु कुटिलो सौ शठो यथा किंचिदुपात्तनदु निजदाहतं तरुणी सखीना-
मिति कोपस्य प्राचुर्यं तथा च सखीजनस्य पुरो लघुरपि कोपो गुरुर्यतः प्राप शांतपक्षे अवधूतं वर्णयति कोधन्यः श्लाघ्यः दयितया मायया कांतया न हन्यते न पात्यते किंभू-
तः प्राकृतो नु कोयं अस्तीति युग्मस्यानिरुक्तोपः किंभूतः निकृतिपरः आत्मगोपनपरः सखीनां केलिनिकेतनं क्रीडागृहं दृढं पहासेन सायं सायः अरसादः तद्योगान्नः सायं कथमु
पहसतीमाह भूयः एवं न भवतीति कोमलगिरा दुश्चेष्टितं केलिगृहणं सूच्यते किंभूतः अमललोलदोषेरचंचलः कायादिभिरस्तुरोयो बाहुलतिकापाससनेन लक्षितः
एते नैतदुक्तं भवति अक्रोधः कोपादिमुक्तं शांतो विष्णुमायया हन्यतएव ८ भविष्यत्प्रोषितभर्तृकालायामोग्ध्यमाह प्रहरेति बालादिनशतप्राप्य अनेकदिन

गम्यं देशं यियासतो गंतुमिच्छतः प्रियस्य गमनं हरति कैर्बालालापैः किंभूतैः सबाष्पगलज्जलैः साश्रुगलज्जलैः जलज्जलैरिति वा पाठः जलज्जलो द्रववस्तुनामेति जलज्जलैरिति लोको
क्त्यानुकरणं किं मेऽस्याभिप्रायमित्याह हे प्रिय प्रहरे गते सति मध्याह्ने वा ततोऽपि परे वा तृतीयप्रहरे वा किमुत सकले द्विगते वा त्वमिह आगमिष्यसि बहुदिनगम्यं यियासतः प्रियस्य संध्यावधि
कथनान्मोऽस्यं निशि विरहासहत्वं च व्यज्यते शांतपक्षे कश्चिदवधूतः किंचिदुपदिशति कामं हंतीति हानिः कामुकः पुरुषः प्रियस्य मित्रस्य गमने ज्ञाने हृदि इति आहरति कोमला
लापैः किंभूतस्य इति ज्ञानेन देवदिनशतं दूरत्वात् तेन गम्यं देशं उपदेशं ज्ञातुमिच्छतः कोऽयमुपदेश इत्याह सकले जाते ज्ञानप्रहरमारभ्य ज्ञाने हि द्विविधं भवति सकलं निष्कलं च अ
त्र मूर्तिचिंतनं सकलं ज्ञानं निरंजनध्यानं निष्कलं तत्र सकलध्यानध्वंसः तस्मिन्सतीति विरामे विरागे सति मध्ये वा यज्ञवैराग्ये मति ततोऽपि परे अथवा विरागाभावेऽपि वा एतेन त्रिविधवस्त्वानुच
वा निरंजनध्यानमौपयिकं भवति किं फलमित्याह आह्नः प्रियत्वमानुत्वतेजो मृग्यत्वमेष्यति ९ याता इति हे सुंदरि हसितेन तत्तासेन भाविमरणोत्साहः सूचितः भविष्यन्निधना

प्रहरविरतौ मध्ये वाह्नस्ततोपि परेऽथवा किमुत सकले जाते वाह्नि प्रियत्वमुपेष्यसि इति दिनशतप्राप्यं देशं प्रियस्य यियासतो हरति ग
मनं बालालापैः सबाष्पगलज्जलैः ९ याताः किं न मिलंति सुंदरि पुनश्चिंता त्वया मत्कृते नो कार्या नितरां कृशासि कथयत्येवं स
बाष्पे मयि लज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः १०

नंदः कथितः विरहदर्शनान्मरणं मरणाद्यथानंदः कथमित्याह लज्जानिश्चलतारकेण धारा ... यमाशोनगलदश्रुणा चक्षुषा मां दृष्ट्वा आसन्नमरणस्यापि एवं चिह्नं भ
वति अपरचिह्नमाह मयि एवं कथयति सति त्वमतिशयत्वक्षीणासि किं तदित्याह याताः प्रस्थिताः किं पुनर्न मिलंति मत्कृते मन्निमित्तं त्वया चिंता न कार्या अहमप्यागमि
ष्यामि प्रस्थावर्तय मयि हृष्टांगि तथा भूतानिश्चलतारका च मया भूते न लक्ष्यते अतः प्रस्थानश्रवणादेव क्षीणतया निश्चलत्वेन कष्टं नवमावस्थेति सूच्यते तथा चोक्तं तनूकृतननु
व्याधिरष्टमा जायते यथा तथा दृष्टधनागतानवमा जायते स्मृतिरिति नवमावस्थालक्षणं एतेन नायिकाया वेगमत्वं व्यज्यते नयेति पाठः सर्वं पूर्ववत् कश्चिन्नायकः स्वरवायं संबो
धयन्नाह शांतपक्षे प्रथमतः कर्म संबोधयति हे मत्कृते मम क्रियेकर्म हे सुंदरि शोभने त्वमति क्षीणासि कर्मक्षयादेव मुक्तिः कुत्र मयि मद्विषये किंभूते एवं कथयति किं तत् याताः

ताः किंमिलंतिनसंशक्ताभवंति स्वंनिःशंकोनिःपरिग्रहइतिस्मृतिनत्वपातोऽस्माकंचिंतानकार्या किंभूतेमयिसर्वदासानंदाश्रो मामेवंचतुर्थाउपलक्षि
तंदृष्ट्वात्वयाभाविमरणोत्साहः सूचितः नकथितः किंचिन्ममनिधनंभविष्यतीति यतुशुभाशुभकर्मक्षयशालीसजितमृत्युर्भवतीति १० संप्रतिश्रोषितंवर्णयन्ना
ह धीरमित्यादिना अन्यमेनपथिकेनतथासमस्तरात्रिंव्याप्यक्रंदितं यथाग्रामीणोग्रामेव्रजतोजनस्यवसतिंनिषिद्धांक्रियते रात्रिमितिकालाध्वनोरित्यादिनाद्वितीयावाधि
करणोध्वनिशब्दंश्रुत्वा किंभूतंधीरंयथास्यात्तथावारिकिरतःजलंविमुंचतः निशीथेअर्द्धरात्रे किंभूतेविरहिणींबालांध्यायता ध्यानादुदश्रुउद्गवायेन दीर्घोच्छ्वासंयथास्यात्तवि
रहिणामश्रुस्यात्तलमश्रुभवतीति शांतपक्षेईश्वरमधिपतिःहेरनहेईश्वर अधन्यधनिःत्वानिः तत्रसाधुर्धन्यः नधन्योऽधन्यः त्वयावारिकिरतःसमुद्रस्यबालांलक्ष्मींध्यायता अ
खिलारात्रिःसर्वकालेनक्रंदितं उत्कंठितंविमुक्तकंठंउद्गलंयथास्यात्तथासमुद्रजलमादायवर्षतीति पारंपर्येणजलकारणंसमुद्रइति किंभूतांविरहिणींवियोगजनितां चंचलामस्थिरां

धीरंवारिधरस्यवारिकिरतःश्रुत्वानिशीथेध्वनिंदीर्घोच्छ्वासमुदश्रुणाविरहिणींबालांचिरंध्यायता अधन्येनविमुक्तकंठमखि
लंरात्रिंतथाक्रंदितंग्रामीणोव्रजतोजनस्यवसतिंग्रामेनिषिद्धायथा ११ कथमपिससखिक्रीडाकोपाद्व्रजेतिमयोदितेकठिनह
दयस्तत्काशय्यावलाद्गतएवसः इतिसरभसंध्वस्तप्रेम्णिव्यपेतघृणेजनेपुनरपिहतव्रीडंचेतःप्रयातिकरोमिकिम् १२

कैरिवग्रामीणोरिव इवशब्दोत्रवोध्यः इतरलोकायथालक्ष्मींवांछतःसमयंनयंतीति अजतःपरिव्राजकस्यधनिरव्यातिश्रुत्वाज्ञात्वापि यदेवंश्रुतंभवतानतोज्ञातं तवाद्
भिरीद्विरूपासामायाएकांतोस्तिइति अरिश्चक्रंतंधारयतीतिचुतस्माचक्रधरस्यविष्णोः ग्रामेवसतिर्निषिद्धात्वयेतियावत् किंभूतेः निशीथे निशीथोमोहनिद्राकालो
पलक्षणंनिर्मोहांधकारइत्यर्थः वैकुंठपुरवासोपिनिषिद्धोवोधितइति एतेनसंसारकामनांसत्काभागवतोभूत्वावैकुंठपुरंव्रजतीतिध्वन्यते ११ कलहांतरितांवर्णय
न्नाह कथमित्यादिना हेसखिकठिनहृदयःशय्यांतस्मात्कावलात्हठात्गतएव कथमित्यादि मयाक्रीडाकोपात्केनकलहेनव्रजेतिउदितेसतिकथमपिकष्टस्सा[redacted]

अ·प्र·टी
५
5

राम
५

संप्रति अहं किं करोमि तस्मिन्नायके अपेतस्पृहो निर्दयेऽनेन प्रकारेण सरभसं ससकौतुकं यथा तथा ध्वस्तप्रेम्णि लुप्तप्रणये जने इतरलोकवत् पुनरपि चेतः प्रया
ति किंभूतं हतव्रीडं निर्लज्जं एतेनात्मनः सखीत्वं व्यनक्ति शांतपक्षे हे उदिते उत्पन्नज्ञानमयलक्ष्मा एकस्थितिके लिंवासस्कार्ज परिव्राजको भव किंभूतः सखिक्री
डाकोपात् मित्रकेलिकोपमतीति निःसंगः निःक्रोधः किंभूतः कठिनहृदयः निर्दयः कठिनेति संबोधनं वा कथंभूतस्त्वं हृदि मनसि अद्यः शुभावहो विधिर्यस्येति स तथा
अधुना सांसारिकमधिक्षिपति हे प्रतिज्ञाने ध्वस्तेऽप्ययनं इति निर्विष्टं प्रेम्णि पुत्रदारादिस्नेहे तत्स्माव लवति पुनरपि हे अपिशब्दः संभावनायां किंभूतं सरभसं सकौतुकं तदा किं
करोषि किमुपदिशति किंभूते प्रेम्णि अपेतस्पृहो उपगतजुगुप्से किंभूते अजने चंचले अजगतिक्षेपणयोः एतेन पुत्रदारादिस्नेहं त्यक्त्वा अवधूतो भवेति सूचितम् १२
संप्रति मुग्धामुपवर्णयन्नाह दंपत्योरिति वधूर्नववधूः एकदेशलक्षणया मुग्धा नववधूस्तत्र लज्जापरतिर्यथा गृहशुकस्य वाग्बंधनं वचननिरोधानं करोति किंभूता व्री

३०

दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्योपहारं वधूः
कर्णालंकृतिपद्मरागशकलं विन्यस्य चंचूपुटे व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बंधनं १३

डार्ता लज्जार्ता कर्णालंकृतिपद्मरागशकलं श्रवणालंकारमाणिक्यखंडं चंचूपुटे विन्यस्य दाडिमफलव्याजेन फलशब्दोऽत्र बीजवचनः तथा च धरणिः फलं
शास्ये च शीतं जेफलके कुष्ठिदानयोः किंभूतं तस्य उपहरणं उपढौकनं किंभूतस्य तद्वचो गुरुसन्निधौ श्वश्र्वादिनिकटे प्रातर्निगदतः तत्किं दंपत्योर्जल्पतो राकर्णितं
एतेन नायिकायाः श्वश्रूर्गृहशुकस्य पटुत्वं व्यज्यते शांतपक्षे ईश्वरमधिक्षिपति हे इन हे ईश्वर निर्व्रीड निर्लज्ज हे आर्त हे उदितद उदितं उद्घाटनं उत्पद्यति खंडयती
ति उदितदः हे आलिसरित्ताकुमारलक्ष्मीर्यस्य कामुकत्वात् हे फलव्याजफलेन ज्ञानानिष्पत्तो व्याजः कपटं यस्य स तथा पद्मरागस्य कलं पद्मरागखंडं स्त्रीपुत्रे विषये विन्य
स्य हूरीकुरु विन्यस्य इति लोट् हि किंभूतं गुरुमत् तत्किं दंपत्योर्जल्पतो निशि यद्वचः आकर्णितं तन्निगदितं चिंतया शुको यथा उपहारं क्षयं त्यजति तस्य मपि रागानूत्सजेति १३

अ॰प्रा॰टी॰ ६

6

संप्रतिखंडितां वर्णयन्नाह अज्ञानेनेति हे चटुल चंचल त्वया किं लब्धं मां दुःखितां परिभवादज्ञानात्पराङ्मुखीं माश्लिष्य अज्ञानेनावैदग्ध्येन विदग्धा हि मानिनीं सम्मु
खीकृत्य आश्लिष्यति त्वया पराङ्मुखी आश्लिष्टेति किंभूतेन त्वया सौभाग्यभाग्यजं एतादृशं नयता कथं चटुल इत्याह पश्य किंभूतं दयिताकुचमतिकरोन्मुक्तांगरागाहृतां प्रिया
सां कुचमालिश्लेषान्निक्षिप्तानुलेपनशोभां एवंभूतं वक्षः वेणीपदैरंकितं चिह्नितं पश्य किंभूतैः मलतैलपंकशबलैः मलयोगात् मलपंकपत्रेण चित्रैः एतेन विरुद्धेति सू
चितं आत्मनश्च वैदग्ध्यं उच्यते अभिनवदोषारसवत्त्वं सरसत्वं सूचितं मानस्यात्वं कथितं अन्यवनितांगलग्नविलेपनमिति रुद्रः साधी रावक्रियकोक्तिवचना नायि
कायाश्च धीरात्वं सूचितं शांतपक्षे ईश्वरं पुनरधिक्षिपति हे दुर्नहे ईश्वर अज्ञानं ज्ञानशून्य हे त्वं चटुल मां लक्ष्मीं आलिंग्य किं त्वया लब्धं कुत्सालब्धेति किं दुःखितायां
कथमित्याह दुःखितां दुःखसंपृक्तां जनयंति जने दुःखं पातयंति विपत्तिषु मोहयंति संपृक्तो कथमर्थोऽभुभावसाद् इति वचनात् लक्ष्मी दुःखदैव किंभूतां परिभवात्

अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां किं लब्धं चटुल त्वयेह नयता सौभाग्यमेतादृशम्
पश्येमां दयिताकुचमतिकरोन्मुक्तांगरागारुणां वक्षस्ते मलपंकितैलपंकशबलैर्वेणीपदैरंकितम् १४

यत्किंचित्परिभवं प्राप्य पराङ्मुखीं विघटितां परिभवादिति पंचगर्भादेरिति पंचमी किंकर्तव्यमिति तदुपदिशति हे दयिताकुचमतिकरोन्मुक्तांगरागाहृता
हे प्रियाकुचालिंगनयुक्तं शरीरं निःकामद्धिया वक्षः किंभूतं वेणीपदैः गंगायमुनादीनां संगमो वेणीति निरुक्तिः वेणीति चवंधे स्यान्नदीनां मेलने पि राम ६
च तस्याः पदैः व्यवसायैः श्लिष्टं अमलता निर्मलता एवं मलविकारः फलादिकं जलं तस्य विकार ऐलपंकमाश्रित कर्दमः इला पृथ्वी तत्र भवः ऐलः तेन शाव
लैः श्लिष्टैः एतैः मसां सारिकं सुखं त्यक्त्वा यागवासी भवेदिति ध्वन्यते १४ मानविशेषं वर्णयन्नाह एकत्रेति चतुरया कोपः कृतार्थीकृतः सपत्नी
कृतः कथमित्याह कांतं प्रति उपचारतो व्यवहारतः कोमलवितानं एकत्रासनसंस्थितिः सहावस्थानं दूरतः प्रत्युद्गमनादेर्वोत्थानेन परिहृता रभसाश्लेषोपि

कौतुकालिंगनमपिसंविघ्नितं वारितं तांबूलानयनछलेन पूर्गपर्णचूर्णादिपुटकं तस्यानयनछलेन छद्मनांतिकेनिकटे आलापोपिनमिश्रितः किंभूतया परिजनं सखी
जनं व्यापारयंत्या कर्मसुनियोजयंत्या एतेन नायिकाप्रशस्ताधीराइतिकथितं तथाचवृत्तदोषमपिसाधीरातस्मिन्नादियतेरूषा यद्वाचः प्रचुरापराद्दत्याद्युदाहरणानि अपि शांतप
क्षेईश्वरोपकरणमधिक्षिपति हेत्रासनाहि हासनमयाएकत्रसंस्थितिः संस्थानं परिहृतं विदूरतः प्रत्युद्गमनात् किंवादूरं प्रत्युद्गमविशेषज्ञानात् बलज्ञानादित्यर्थः हेतांबूलयुगपु
टछलेन कपटेनआनय हे रमस कौतुकं निश्चरयेतिनसंविघ्नः त्वकः हे परिजन व्यापारेत्र यथा श्रमुकआलापोपिन विश्रुतः एतां त्वस्या किंकरोषि इत्याचारचतुरया मोक्षाभियाकांतं दृद्धि
यांतंयांतात्राहमंतिके संप्रतिकृतार्थीकृतः किंभूतोहं कोपः निःक्रोधः एतेनेंद्रियसुखं त्वस्का श्रवधूतः कृतार्थीभवतीति १५ नायिकांवर्णयित्वा तस्याएकाज्येष्ठाकनिष्ठादिभे
देनेतरयेदग्धंवर्णयति तथाचोक्तं एकाज्येष्ठाकनिष्ठान्यानायकंप्रणायंप्रति उदाहृतं शठक्षिराणीकुर्वन्नवलयकांतिनीलइति दृष्ट्वेति धूर्तश्चतुरः अपराज्येष्ठा नविद्यतेपरायस्याइतिप्रेय

एकत्रासनसंस्थितिः परिहृताप्रत्युद्गमाद्दूरतस्तांबूलाहरणछलेनरभसाश्लेषोपिसंविघ्नितः आलापोपिनमिश्रितः परिजनंव्यापारयंत्यांति
केकांतंप्रत्युपचारतश्चतुरयाकोपः कृतार्थीकृतः १५ दृष्ट्वैकाशनसंस्थितेप्रियतमेपश्चादुपेत्यादरादेकस्यानयनेपिधायविहितक्रीडानुबंधछ
लः ईषद्वक्रिमकंधरः सपुलकः प्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकांधूर्तोपरांचुंबति १६

सींचुंबति किंकृत्वा एकासनसंस्थितेप्रियतमेदृष्ट्वा पश्चादुपेत्य आदरात्संभ्रमेणएकस्यानेत्रे आछाद्य कृतकेनानुबंधेछयाईषद्वक्रिमकंधरः सन् किंभूतामंतर्हासलसत्कपोलफल
कां उभयोरनुरंजनत्वाद्विदग्धं तथाचकविमंथरूपारः वल्लीनांप्रेयसीनांयः कुरुतेचित्तरंजनं सविदग्धइतिख्यातः कलासुकुशलोपिसः इतिस्वभावनीयानोअस्तंतालंकारोयेना
यकस्य शांतपक्षे धूर्तः संसारेत्रापरित्यक्तः अपरांशक्तिंचुंबतिसंयोजयति चुबिवक्त्रसंयोगेधातुः सक्षणायासंयोगार्थः नविद्यतेपरायस्याः सातथा अः विष्णुस्तस्मरांश्रेष्ठामितियाव
त् अइवपरां अपराभितिवा भीतगोचराणांमनसांचविषयत्वं ज्ञानिज्ञानपरिछिन्नंवंदेतांचेश्वरींपरामितिविष्णुपुराणे किंभूतविहितक्रीडानुबंधछलः विशद्दोविरोधार्थः वि
रोधिवत्केलिप्रकारः ईषद्वक्रिमकंधरः आसनविशेषणोभवति तदुक्तंयोगशास्त्रे हृदयेन्यस्यचिबुकः पादौचान्योन्यसंहतौ नासाग्रेचापिपवनोभवेद्योगीजितेंद्रियइति सपुलकः प्रा
णायामविशेषेरोमांचः सरभसइतिप्रेमोल्लसन्मानसांत्यक्त्वा उल्लसन्मानंयत्रतथा अंतर्हासः नश्रंतर्विकाशेनउल्लसत्कपोलफलकंयस्याः ज्ञानात्प्रकाशाप्रसन्नवदनाअवधूता

भवंति किंकृत्वा एकस्मामायया व नयने आलोचने जगतो मायात्वात् मायाया एकत्वं एकाशनसंस्थिते एकाधारगते देशकीप्राय स्तां दृष्ट्वा अजामेकामिति श्रुतिः ए
तेन यो वक्ष्यनो भवति सांसारिकां मायां तत्कापरां शक्तिं ध्यायतीति मुक्तिसोपानं १६ कलहांतरितां वर्णयन्नाह चरणेति स्तनस्थितहस्तया दृष्टिः सखीषु नि
वेशिता अर्पिता उच्चैर्निःश्वस्य दीर्घश्वासं मुक्त्वा कस्मिन्सति रमणे व्रजति सति उक्त्वा परुषीकृते किंतव हे निभृत किंवा दिरहे शाविरस पाठ प्रसादपराङ्मुखे
चाटुके प्रसादे चरणपतनप्रत्याख्यानानु उपेक्षायां चाटुकारमयी त्वादिक कलहांतरिता लक्षणं स्तनस्थितहस्तया हृदयेनेन सूक्ष्मालंकारकथनं इंगिताकारलक्ष्यार्थः
सोक्ष्मात्सूक्ष्म इति नयनछलेन मनेन तथा अश्रुभिर्दृष्टिर्विरुद्धा तथा भवतीमिरयं विरुद्धतामिति कथयति दीर्घनिश्वासेनाजीव विरहो मन्यते शांतपक्षे सकामम

चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते व्रजति रमणे निश्वस्योच्चैः स्तनस्थितहस्तया नयन
सलिलछलाद्दृष्टिः सखीषु निवेशिता १७ कांतागाढतया स्ववद्ध्वसन प्रांता किमर्थं पुनर्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति
मातः सुप्तमपीह वारयति मामित्याहितक्रोधया पर्यस्य स्वपितिछलेन शयने दत्तोवकाशस्तया १८

क्षिपति हे स्तनस्थितहस्त रमणे क्रीडायां याद्दृष्टिः साश्रुः सखीषु निवेशिता इति निभृतकितवाचारे ममताकामसंयुक्तो न भव हे चरणाजंगम अव
धूता हि जंगमा भवंति कामश्च वहनो हि खंडितो भवति तत्केन परुषा क्रोधेन कर्कशीकृते इत्युक्त्वा एतेन कामित्वं तस्मात्परिव्राजको भवेत्यर्थः १७ संप्र
तिमानिन्याः प्रसादनोपेक्षणकर्तृत्वं वर्णयति तथा सामं च दानं च भेदश्च सानुपेक्षणमिति तथा दूत्यादिना प्रसादनापेक्षायाः प्रसादेन विधिं तत्काकाकैर राम ७
न्यर्थसूचकैः यत्र प्रसादयेद्योषित् तदुपेक्षा तु सा मता कांतेति तथा आहितक्रोधया पूर्वविहितमानया पर्यस्य सुप्तछलेन शयने शय्यायां अवकाशो दत्तः
कस्मिन्सति प्रिये तत्परिजनं तस्याः सखीजनं एवं पृच्छति किंतत् इयं लोलाक्षी चंचलनयना: मुग्धाक्षीति पाठः सुगमः किमर्थं स्वपिति किंभूतेयं कांता मेखल
यागाढतरबंधनप्रांता एतेन मानो मन्यते लोलाक्षीत्यनेन कपटनिद्रा मन्यते किंकृत्वा अवकाशो दत्तः सुप्तमपि वारयतीति हेत्वेत्यनेन उपासकं पृच्छति

तत्सदिति श्रुतेः तत् शब्देन ब्रह्मोक्तं किं तदित्याह कांचीनामनगरी तयागाढं तयासम्यक्सेवितः अवधूतवसनस्य शांता चहतनिवासे चदेशाच्च मुक्तिक्षेत्रत्वात्
तस्माच्च अयोध्यामथुरामायाकाशीकांचीअवंतिका पुरीद्वारावतीज्ञेयाःसप्तैतामोक्षदायका तयाच किमर्थं नकिंचित्कामःनिर्भोगमनिःकपटस्थभवति १८
नायिकामानभंगं वर्णयित्वाद्वयोर्मानभंगमाह एकस्मिन्नित्यादिना दंपत्योर्गौरवयतोर्मानकलीमानकलहःभग्नः कथमित्याह शनकैः अपांगवलनात् शनकैर्मं
दं अपांगयोर्वलनात् मिश्रणात् मिश्रीभवच्चक्षुषोर्द्वेकीभवन्नयनयोः चक्षुशब्दोऽत्र दृष्टिवचनः लक्षणया अतएव सहासव्यासक्तकंठग्रहत्वं एकस्मिन्शयने तुल्यशय्या
यां पराङ्मुखतयावीतोत्तरं यथास्यात्तथा ताम्यतोः स्थितयोः कथमित्याह अन्योन्यस्य हृदिस्थितेप्यनुनये प्रेम्णि स्थितेगौरवं संरक्षतोः एतेनद्वयोरप्युत्तमत्वमुच्यते शांतप
क्षे मुक्तये उपदिशति हे तयावीत तया मायया वीतत्यक्त एकस्मिन्शयने पराङ्मुख एकत्रावस्थितमपिदंपत्योर्गौरवं त्वस्य दूरीकुरु किंभूतयोः उत्तरं उत्तरकालं ताम्यतोः किंभू

एकस्मिन्शयने पराङ्मुखतया वीतोत्तरं ताम्यतोरन्योन्यस्य हृदि स्थितेप्यनुनये संरक्षतोर्गौरवं दंपत्योः शनकैरपांगवलनान्मिश्रीभ
वच्चक्षुषोर्भग्नो मानकलिः सहासरभसव्यासक्तकंठग्रहः १९ मुग्धे मय्यपि किं प्रपद्यत इति स्थैर्यं मयालंबितं किं मामालपतीत्ययं ख
लु शठः कोपस्तथाप्याश्रितः इत्यन्योन्यविलक्षदृष्टिचतुरेस्मिन्नवस्थांतरे सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया २०

तत्त्वं अन्यः संसारादन्यः अन्यद्विशेषणं समानं तदा कलिः कलियुगव्यवहारो मानोभग्नः भग्नएव एतेनैतदुक्तं भवति योवधूतो भवति एकत्रासनमास्थितः निष्कामश्च
भवतीति संभोगपूर्वीमवस्थां मापश्येति १९ कश्चिन्नायको नर्मसचिवमाख्याति सव्याजं सच्छलं हसितं किंकृत्वा वयं पश्यामः मयि मद्विषये नायिकया किंप्रपद्यते.
क्रियते कपटशालिनि मयितया कोप आश्रितः अयं शठो धूर्तो मां प्रलापयतीति हत्वारात्नेः गाढानुरागांतरे गाढदृष्टिवलनात् मानभंगे त्वमत्वं अभ्यते शांतपक्षे संसारिकमधिक्षिपति
इत्यन्योन्यज्ञानवाद्विर्निद्धृतज्ञानं तस्मात् तस्मादन्यः शठः कपटीमां लक्ष्मीं आलपति तं भावयति सेवत इति यावत् मायायाः लक्ष्म्याः किं स्थैर्यं नामलंबितं एवं न किंकृत्वा मयिमद्वि
षये असौ प्राप्यते नतत् पश्येमं इति हत्वा कथं लक्ष्मीति बनमप्युक्तं इत्याह अवस्थांतरे प्रसंगांतरे सव्याजं सच्छलं मुक्तः पुरुषो धृतिहरो भवतीति अबाष्पः अनश्रुः संभावनात् तस्मिन्पुरुषे
नु मायया लक्ष्म्या हसितं किंभूते अन्योन्यविलक्षदृष्टिचतुरे परेत्वं निरीक्ष्य दर्शनकुशले यदा लक्ष्मीकटाक्षी तदा अन्यैः कार्यं प्राप्तं दर्शन आसीदेतेनयो वधूतो भवति लक्ष्मीं च चलां प्रति

अमरुटी. १०

मानवर्णनोपायेन रतिं वर्णयन्नाह परिम्लानइत्यादि तयाप्रसादः कथितः केनवाक्येनाश्रुणा पक्ष्मग्रांतव्रजपुटनिरुद्धेन पक्ष्माणि नेत्रलोमानि तेषां ग्रांतेन अग्रसमूहेन यः पुनस्तेन ९
तेनघनपक्ष्मत्वात् पद्मिनीत्वं व्यज्यते यथास्तनतटविशीर्णेनइत्यनेनानुस्वारेणाव्यज्यते तथाचकविकंठाभरणे दोर्मूलोत्कोलनेचैवस्तनयोःस्पर्शनंछलात् इतिरागांगितं लक्षः कथं प्रसादेव्य
तद्रूपाह मानेपरिम्लानेसति मयिप्रणिपतनमात्रे कशरणेप्रणामसमात्रे कृतशरणेसति केवलं दैन्यमालंब्य तया स्थ्रियते अतः क्षीणोपाये उपायांतररहिते प्रणिपातप्रतीकारः संरंभो हि महतां
नाभिनिनाधिकायामहत्वं व्यज्यते मानेचिह्नमाह तस्याःमुखशशिनिमुखचंद्रे करधृतेसति हस्तन्यस्तकपोलेसति मानलक्षणं नायिकाश्चमध्यमा प्रयातिकासुगाद्वागंसदमासामतायथा
शांतपक्षेश्रृंगारसमधिक्षिपति तस्यानाधिकायाः करधृतेकालेमदधर्मोचितिर्येष्याः सातथा मयिमद्विषयेप्रणिपाते मयिकिंभूते प्रणिपतनमात्रेकशरणे निषेधस्तेनमात्रश्रयेयत् किंचित्काल्य
गेनुदेवनंभवतीतिश्रुतेः मानेअहंकारेपरिम्लानेगंडेपायंशरणस्येतिशशिनुश्रीलंयस्य तादृशतगतौ कथमित्याह तयामायया प्रसादः कथितः कथंज्ञायतइत्याह वाक्येन अतिप्रसादादितिआनंदा

परिम्लानेमानेमुखशशशिनितस्याः करधृते मयिक्षीणोपाये प्रणिपतनमात्रैकशरणे तयापक्ष्मप्रांतव्रजपुटनिरुद्धेनसहसाप्रसादोवा
क्येनस्तनतटविशीर्णेनकथितः २१ तस्याःसांद्रविलेपनस्तनतटप्रश्लेषमुद्रांकितं किंवक्षश्चरणानतिव्यतिकरव्याजेनगोपाय्यते
इत्युक्तेकतदित्युदीर्य्यसहसातत्संप्रमार्ष्टुंमयासाश्लिष्टारभसेनतत्सुखवशात्तन्व्यापितद्विस्मृतम् २२

श्रुयाली नाम वंतिइति २१ निःशंकं नायकं वर्णयन्नाह तस्याइति सामयाआश्लिष्टा किमर्थं तत्संप्रमार्ष्टुं कतदित्युक्त्वा किमित्याह वक्षः किंगोपायते किंभूतं तस्याःअन्य
नाधिकायाःसांद्रविलेपनस्तनतटप्रश्लेषमुद्रांकितं घनमनुलेपनंयत्र एवंभूतोयस्तनतटस्तस्यायाप्रश्लेषमुद्रा आलिंगनपरिपाकः तेनांकितं चिह्नितं अनुलेपनत्वेनतस्याअ
येदग्धंमज्यते चरणप्रणिपातछलेनआलिंगनसुखतयानायिकयापितन्यादिचिह्नं विस्मृतं निःशंकहृतदोषोपिइत्यादिरुद्रवचनान्निःशंकत्वंनायकस्य शांतपक्षेईश्वरम
धिक्षिपति हेइनहेईश्वर चरणानतिकरव्याज पादप्रतिपन्नेषुव्याजः कपटं यस्यसतथावक्षोहृदयंकिंगोपायतेसंव्रियते तस्यामायायासांद्रविलेपनं निविडानुभवः यएतस्त
नतटंतस्याप्रश्लेषमुद्रातयाअंकितंकृतदित्याशापवले किंहत्वाकतदुत्तकुत्रेत्युक्त्वा किमर्थंमयालक्ष्मातत्प्रमार्ष्टुंप्रोक्षितुं किंभूतेतयातन्व्या अल्पयातत्सुखवशाद्बुद्धविस्मृ
तं एतेनैतदुक्तंभवति त बमायायानुभावेनैमुग्धानप्रलमानमानयंति २२ उपेक्षायोवनमानिन्याःप्रसादंवर्णयन्नाह त्वंमुग्धाक्षीति आलीजनःसखीजनः निर्यातः

8

राम ८

शनैकैर्मंदं मंदं अलीकवचनोपन्यासं यथास्यात् कपटवचनोपन्यासं यथास्यात् एतेन सखीनां चातुर्य्यं किंभूतः शाय्योपांतनिविष्टया सस्मितमुखी अर्था
न्मुख्यानायिका तस्यानेत्रोत्सवेनानंदितेन घनप्रसादेन हर्षितः कस्मिन्सति प्रियतमे दूत्यभिधायिनि सति कथयति सति किं तत् हे मुग्धाक्षी सुंदरनयने कंचुलिक
याविनापि किं मनोहारिणीं शोभां नधत्से अपि तु धत्स एव किंभूते तद्वीटिकासंस्पृशि कंचुलिकयोर्बंधनप्रदेशो वीटिकातत्संस्पृशि बंधनमोचनकामे सतीतियावत्
प्रसाधनविधिं त्यक्त्वा वाक्यैरन्यार्थसूचकैः यत्र प्रसाधने योषित् उपेक्षा सा मता यथा दूतिवचनात् उपेक्षेयं शांतपक्षे मानसमधिक्षिपति हे मनः त्वं लक्ष्मीं धत्से अभिलषितं
किंभूतां हारिणीं हरंती हारः तद्योगात् हारिणी लक्ष्म्याश्च चलत्वात् अत एव मुग्धाक्षी मूढदर्शनं अक्षिशब्देन लक्षणया अक्षिभिर्द्रियते तद्योगात् वीटिकाशब्दोत्र बंधनवचनेन ल
क्षणयाप्रकरणात् संसारबंधनमोचने मित्रजनसामान्योपि निर्यातः परिव्राजको बभूव किंभूतः आली वचनोपन्यासम् आलीकपटजनबंधने योमुक्तः अवधूतोहि व

त्वं मुग्धाक्षि विनैव कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि । शय्योपांतनिविष्टसस्मितमु
खीनेत्रोत्सवानंदितो निर्यातः शनैरलीकवचनोपन्यासमालीजनः २३ भ्रूभंगे रचितेपि दृष्टिरधिकं सोत्कंठमुद्वीक्ष्यते कार्क
श्यं गमितेपि चेतसि तनूरोमांचमालंबते रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने २४

ष्टिः कपटबंधनेनात्मानं संवृणुते किंभूतः तत्नोत्सवानंदः नयनाक्षिप्तेन गुणोत्साहेन नंदितः आनंदमयीकृतः सस्मितमुखीमठासवनसुक्तः शाय्योपांतनिवि
ष्टइति मनोविशेषणं निद्रामाप्नायुक्तेतियावत् एतेनैतदुक्तं भवति मनसो लक्ष्मीलिप्सां दूरीकृत्य सद्गुरूपदेशो नानपेक्षो भूत्वा अवधूतेन भवितव्यम् २३
अनुरागविशेषमाह भ्रूभंग इति सख्या मानार्थं शिक्षिता काचिदनुरागभावमाह हे सखि तस्मिन्जने दृष्टे सति कथं मानस्य निर्वहणं निर्वाहो भविष्यतीति क
थमित्याह भ्रूभंगे भ्रुकुट्यादौ रचितेपि दृष्टिः सोत्कंठं यथा स्यात्तथा अभिवीक्षते वाचि रुद्धायामपि रूयं दग्धाननं सस्मितं जायते दग्धमिति धिक्कारोक्तौ चेतसि मन

अ.श.टी
८

सिकर्कशतांगमिते प्रापिते स्वतः कर्कशं न भवति किंतु कर्कशतां गमे च तन्नूतोमं चमेवमालंबते एतेनांतरानुरागः प्रकाशितो भवतीति शांतपक्षे अहं
कारिणमधिक्षिपति तस्मिन् वस्तुनि दृष्टे साक्षात्कृते सति अहंकारस्य कथंचनिरोधो भवति यतः कामादयो विनश्यंति तस्मिन् दृष्टे परात्परे सेदृग्यस्मादृष्टे भ्रूभंगे भ्रुवोरेव भंगि
तास्य अधिकंवीक्ष्यते भ्रुवोरंतरगतादृष्टिर्भवत्यनयोगिनमिति किंभूतया यामो नेत्रादृष्टे अनेन जीवनं सस्मितं दृष्टं जायते जीवनोत्सो होभवतीति चेतसि कार्कश्यं गमिते स्त्रीपुत्रादि
संमोहत्यक्तवति तनुः सपुलका भवति आनंदतोरोमांचः स्यादिति नैतद्युक्तं भवतीति मोहात्मनो निर्विज्यस्य तथा चं संयम्य भ्रुवोरंतर्गतं स्तत्वा अहंकारं त्यक्त्वा डास्ससे नामित्युपायः २४
भविष्यत्प्रोषितभर्तृकाया अवस्थामाह कांतेति कश्चिन्नायको वदति हे कांते त्वं दृशौ मीलयित्वा कतिचिद्वासरान् गमय चक्षुर्निमेषद्वयं कतिचिद्दिनानि नय नायिका वदति
स्वस्तिस्वस्तीत्यंगीकारे नयने निमीलयामि तावत् यावत् शून्यादिशो न भवंतीति भवंतो यावत् न गच्छति किं वा दिशो मंडलाकारदर्शनं तया यावन्न शून्या भवंति तावदेव चक्षुर्निमीलया

कांते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः
आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयः संदेशो वद कस्त्वयाभिलषितस्तीर्थेषु तोयांजलिः २५

मि अन्यथा मनसाद्यभावादिकद्वंमंडलाकारमिति कामशास्त्रे कांतः पुनराह आयातावयं कांताह सुहृद्वर्गस्य मित्रसमूहस्य भाग्यो भाग्योदयेरण राम
मिष्यतिन मेति भावः कांतः पुनराह तवाभिलषितो वांछितः कः संदेशः कांताह तीर्थेषु तोयांजलिः एतेनाहं प्राणांस्त्यक्ष्यामीत्याक्षेपे गागमनं तेभिहृद्गतेन ८
त्याक्षेपालंकारः शांतपक्षे भिक्षुजनमुपक्षिपति हे सुहृन्हे मित्र कांते कमनीये स्त्रीपुत्रादौ वस्तुनि त्वं दृशौ मीलयित्वा तन्नश्वरः कतिचिद्वासरान् गमय
तव नयने अहं निमीलयामि सुदृढयामि यावद्दिशः शून्या नायिका शून्या न भवंति विशिष्टा स्त्री शून्या द्युतिज्ञानं नोत्पद्यते दिशोऽलंकारादिपदृतिधर
रिः स्वस्तिस्वस्तीति प्रारंभेतत् किं पश्चाद्भिक्षुराह आयातौ सत्यायस्तज्ञाने सति अयं शुभावहः किं यथा आगमिष्यति लिप्सते वर्गस्य कुलस्य दयैभाकुमाज

नेकर्तारीकिप् एकोज्ञानीवंशमेवतारयतीतिश्रुते: तीर्थेषुतोयांजलिर्यं शतात्तारयत्येतिचेत्तत्राह आभिरयातिमिस्त्वं [illegible] ज्ञाचवसितत्र्थवंधः कःस्ती
र्थेषुतोयांजलिःसन्नृप्रादेशः अपितुसचवंधःसःस्नातः सर्वतीर्थेषुपरंब्रह्मलितिविंदतीतिश्रुते: एतेनैतदुक्तंभवति संसारवासनाद्दष्टिनितस्यतत्वज्ञानंजायते
तस्मिंश्चसतिवंशोद्धारस्तासर्वतीर्थफलंचजायतेइति २५ संप्रतिकालाध्यात्मानंवर्णयन्नाह सेति

10